# संस्कृत वार्ता:

दिनाङ्क : 14/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- वैश्विक-अनिश्चिततायाः आर्थिक-समाह्वानानां च मध्ये ब्रिक्स-देशाः रचनात्मिकां भूमिकां निर्वहन्ति इति भारतेन दृढतया प्रतिपादितम्; नवदिल्ल्यां अद्य द्विदिवसीय ब्रिक्स-विदेश-मन्त्रिणां सम्मेलनस्य आरम्भः अभवत्।
- श्वः प्रधानमन्त्रिणः नरेन्द्रमोदिनः आबुधाबी-यात्रायाः समये भारत-यू. ए. ई. देशौ द्वैपाक्षिक-सम्बन्धान् अग्रिमस्तरे नयितुं सज्जते स्तः।\
- काङ्ग्रेस्-दलस्य नेता वी. डी. सतीशनवर्यः केरलम राज्यस्य मुख्यमन्त्री भविष्यति।
- भारतस्य निर्वाचनायोगेन स्पष्टं यथार्थं च मतदातृ-सूचीं सुनिश्चेतुं षोडश-राज्येषु त्रिषु केन्द्र-शासित-प्रदेशेषु च एस्. आई. आर्. इत्यस्य तृतीय-चरणस्य घोषणा कृता।
- अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः तथा चीन-देशस्य राष्ट्रपतिः षी चिनफिंगः इत्येषः च बीजिङ्ग-नगरे महत्त्वपूर्णं वार्तालापं कृतवन्तौ।

---

<u>ब्रिक्स - पीएम</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्यां ब्रिक्स-विदेशमन्त्रिमण्डलस्य विदेशमन्त्रिभिः सह मेलनं कृतम्। रूस-देशस्य विदेशमन्त्री सर्गेई लावरोवः, ईरान-देशस्य विदेशमन्त्री अब्बास अराघची, दक्षिण-अफ़्रीका-देशस्य विदेशमन्त्री रोनाल्ड लामोला, ब्राज़ील-देशस्य विदेशमन्त्री माऊरो विएरा इत्यादयः अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितवन्तः। इदम् उपवेशनं नवदिल्ल्यां प्रचलिते ब्रिक्स-विदेशमन्त्रिमण्डलस्य सम्मेलनानन्तरम् अभवत्। ततः पूर्वं, विदेश-मन्त्री डा. एस. जयशङ्करः स्वस्य प्रारम्भिक-भाषणे उक्तवान् यत् वैश्विक-व्यवस्थायाः केन्द्रस्थाने शान्तिः सुरक्षा चास्ति। सः अवदत् यत् अद्यतनीयाः संघर्षाः केवलं संवादस्य कूटनीतेः च महत्त्वं प्रदर्शयन्ति। सः अवधानं दत्तवान् यत् वर्तमान-संघर्षाः, आर्थिक-अनिश्चितताः, व्यापारस्य, तन्त्रज्ञानस्य, ऋतुदशा समाह्वानानि च वैश्विक-परिदृश्यं निर्मीयन्ते, तथा च

अस्मिन् विषये ब्रिक्स-देशाः रचनात्मक स्थिरतां च आनेतुं महत्वपूर्णां भूमिकां निर्वहन्ति। डा. जयशङ्करः सहभागीदेशानां तेषां उपस्थित्यै, ब्रिक्स-संरचनायाः अन्तः सहकारं सुदृढीकरणाय निरन्तरं प्रतिबद्धतायै च धन्यवादम् अददात्। ऊर्जायाः, आहारस्य, उर्वरकस्य, स्वास्थ्यसुरक्षायाः च विषये नैकेदेशाः निरन्तरं समाह्वानानां सम्मुखीकरणं कुर्वन्तः सन्ति इति मन्त्रिणा उक्तम्।

------------------------------------------------------------

## पीएम-यू.ए.ई. यात्रा

श्वः शुक्रवासरे आबुधाबी-नगरे यदा प्रधानमन्त्रिणः नरेन्द्रमोदिनः यू. ए. ई-देशस्य राष्ट्रपतिना शेख मोहम्मद बिन जायद अल नाह्यान इत्यनेन सह मेलनं भविष्यति तदा भारत-यू. ए. ई. देशयोः मध्ये दृढं सहभागित्वं अग्रिमस्तरे नयितुं सज्जता अस्ति। उभौ नेतारौ समग्र-सामरिक-सहभागित्वस्य पूर्णव्याप्तिः समीक्षितवन्तौ, तथा च अनेकेषां महत्त्वपूर्णानां सन्धेः आदानप्रदानस्य साक्षीभूतौ। औपचारिक-सामरिक-रक्षा-सहभागितायाः कृते कार्यं कर्तुं आशयपत्रम् एव सर्वाधिकं परिणामात्मकम् आसीत्, यत् द्वैपाक्षिक-सुरक्षा-सम्बन्धेषु प्रमुखं सोपानम् आसीत्।

------------------------------------------------------------

## केरलम् मुख्यमन्त्री

दशदिनानि यावत् प्रचलितं उच्च-नाटकीयतां, उत्कण्ठां च समाप्य, काङ्ग्रेस-दलेन अद्य वी. डी. सतीशन इत्यस्य नाम केरलम् राज्यस्य नूतन-मुख्यमन्त्रीरूपेण घोषितम्। एषा घोषणा नवदिल्ल्यां वर्ताहरसम्मेलने काङ्ग्रेस-नेतारः अजय माकनः, मुकुल वासनिकः, दीपा दासमुन्शी इत्येताः कृतवन्तः। घोषणया सह, काङ्ग्रेस-नेतृत्वे यू. डी. एफ. राज्ये सर्वकारस्य निर्माणं कर्तुं प्रवर्तयिष्यति, येन पक्षे द्वन्द्वः समाप्तः।

------------------------------------------------------------

## अमित-शाहः

केन्द्रीय-गृह-मन्त्री अमित-शाहः अद्य अवदत् यत् एन. डी. आर. एफ. इति राष्ट्रिय-आपद्-प्रतिक्रिया-बलेन विंशति वर्षाणाम् अल्पावधौ सम्पूर्णे देशे चत्वारिंशोत्तरैकशत कोटि-जनानां विश्वासम् अर्जितम्।

गृहमन्त्रिणा अधोरेखितं यत् यत्र यत्र एन. डी. आर. एफ़-दलस्य कर्मचारिणः सम्पूर्णे विश्वे गतवन्तः तत्र ते जनानां प्रेमं विश्वासञ्चार्जितवन्तः।

------------------------------------------------------------

## निर्वाचनायोगः एस आई आर

भारतस्य निर्वाचन-आयोगेन विशेष-पुनरीक्षण-संशोधनस्य, एस.आई.आर. इत्यस्य तृतीय-चरणस्य घोषणा कृता, यत् षोडश-राज्येषु त्रिषु केन्द्र-शासित-प्रदेशेषु च चरणबद्धरूपेण सञ्चालितं भविष्यति। अस्मिन् चरणे आन्ध्रप्रदेशः, अरुणाचलप्रदेशः, हरियाणा, झारखण्डः, कर्नाटकः, महाराष्ट्रः, मणिपुरः, मेघालयः, मिजोरमः, नागालैण्डः, ओडिशा, पञ्जाबः, सिक्किमः, त्रिपुरा, तेलङ्गाना, उत्तराखण्डेति सम्मिलितानि सन्ति। दिल्ली, चण्डीगढः, दादरा-नगर-हवेली, दमन-दीवः इत्येताः केन्द्रशासितप्रदेशाः सन्ति। मतदातृ-सूची-संशोधन-प्रक्रियायां एतत् महत्त्वपूर्णं सोपानम् अस्ति, यस्य उद्देश्यं सम्पूर्णे देशे स्पष्टं यथार्थं च मतदातृ-सूचीं सुनिश्चेतुं भवति।

------------------------------------------------------------

## ट्रम्प-चीन यात्रा

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेन चीनदेशस्य राष्ट्रपतिना षी चिनफिंग इत्यनेन सह अद्य बीचिङ्ग-नगरे वार्तालापः अभवत्। व्यापारस्य, तन्त्रज्ञानस्य, क्षेत्रीयसुरक्षायाः च विषये उद्विग्नतायाः मध्येऽपि उभौ नेतारौ परस्परविरोधस्य विषये सहकारस्य विषये अवधानं दत्तवन्तौ। द्वितीय-राष्ट्रपति-कार्यकाले ट्रम्पस्य चीन-देशस्य एतत् प्रथमं भ्रमणम् अस्ति। व्हाइट-हाउस इत्यस्य अनुसारं, ऊर्जा-मुक्तप्रवाहस्य समर्थनाय होर्मुज़्-जलसंधि अवश्यमेव उद्घाटिता भवेत् इति उभौ पक्षौ स्वीकृतवन्तौ। अस्मिन् उक्तं यत्, राष्ट्रपतिना षी-वर्येण सह ट्रम्पस्य मेलनम्

उत्तमम् आसीत्। उपवेशनानन्तरं जनसमूहं सम्बोधयन् चीनदेशस्य राष्ट्रपतिः षी-चिनफिंग-वर्यः, चीन-अमेरिका-देशौ प्रतिद्वन्द्विनौ न भूत्वा, सहभागिनौ भवेताम् इति उक्त्वा, संघर्षस्य उपरि सहकारस्य पोषणस्य विषये अवधानं दत्तवान्। सः उभयोः राष्ट्रयोः मतभिन्नतायाः अपेक्षया सामान्याभिलाषाः अधिकाः सन्तीति अवोचत् तथा च द्वैपाक्षिकसम्बन्धेषु नूतनस्य अध्यायस्य आह्वानम् अकरोत्।

---------------------------------------------------------------

**ऋतु-विभाग:**

भारत-ऋतु-विभागेन अद्य पश्चिम-मध्यप्रदेशस्य, पश्चिम-पूर्व-राजस्थानस्य, गुजरातस्य, महाराष्ट्रस्य च केषुचित् भागेषु तीव्र-उष्णतरङ्गस्य पूर्वानुमानं प्रकटितम्। दिने कोङ्कण-गोवा-प्रदेशयोः उष्णार्द्रं ऋतुः भवितुम् अर्हति। अद्य उत्तर-पूर्व-भारतस्य केषुचित् भागेषु, अण्डमान्-निकोबार्-द्वीप समूहेषु, केरलम-राज्ये, माहे-प्रदेशे, पश्चिमबङ्गप्रदेशे, सिक्किमे, तमिलनाडु-राज्ये, पुद्दुचेरी-प्रदेशे, करैक्कल-प्रदेशे च प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमानितम्। तटीय-कर्नाटकस्य, झारखण्डस्य, उत्तरान्तरिक-कर्नाटकस्य च केषुचित् स्थानेषु अद्य वृष्टेः सम्भावना विद्यते।

---------------------------------------------------------------

**आई पी एल**

आई पी एल इति इण्डियन-प्रीमियर-लीग क्रिकेट-क्रीडायाम् अद्य सायङ्काले धर्मशाला-नगरस्य हिमाचल-प्रदेश-क्रिकेट-एसोसिएशन-क्रीडाङ्गणे पञ्जाब-किङ्ग्स दलं अद्य, मुम्बई-इण्डियन्स दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।

।। इति वार्ता: ।।